# Shrirama Sahasranamastotram 6

# શ્રીરામસહસ્રનામસ્તોત્રમ્ ૬

## Document Information

Text title : Ramasahasranamastotram by Swami Jayaramadeva

File name : rAmasahasranAmastotramjayarAmadeva.itx

Category : raama, rAma, sahasranAma

Location : doc_raama

Transliterated by : Aman Raja Sood

Proofread by : Aman Raja Sood

Latest update : May 21, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 21, 2026

*sanskritdocuments.org*

# શ્રીરામસહસ્રનામસ્તોત્રમ્ ૬

॥ શ્રીઃ ॥

ધ્યાનમ્ -
નવલનલિનનીલં લોકલીલાલલામં
મદનમધુરમૂર્તિં રત્નસિંહાસનસ્થમ્ ।
વિલુલિતવનમાલં સીતયા શોભમાનં
સ્મિતમુખમભિરામં નૌમિ રાકેશરામમ્ ॥ ૧॥

પ્રેમોત્ફુલ્લમુખારવિન્દમધુપં કેશાવલીસુન્દરં
સર્વાઙ્ગે પ્રિયયા પ્રસૂનરચનાશ્રૃઙ્ગારલીલામયમ્ ।
હસ્તે પઙ્કજપુષ્પગુચ્છલસિતં વિદ્યુલ્લતાવીક્ષણં
વૈદેહીસહિતં પ્રમોદવિપિને રામં વ્રજન્તં ભજે ॥ ૨॥

અરવિન્દમકરન્દમિલિન્દમૂર્તિં
કન્દર્પદર્પદમનં કમનીયકાન્તિમ્ ।
શ્રીજાનકીવદનચન્દ્રચકોરરૂપં
સાકેતનાથમજિતં સતતં નમામિ ॥ ૩॥

## અથ શ્રીરામસહસ્રનામપ્રારમ્ભઃ ।

ૐ લીલાવતારિણં પૂર્ણં બ્રહ્મ બ્રહ્માદિવન્દિતમ્ ।
શાન્તં સનાતનં કાન્તં વન્દે સંસારકારણમ્ ॥ ૧॥

રામં રઘુવરં શ્યામં રાઘવેન્દ્રં રમાપતિમ્ ।
રસાનન્દં રમાનન્દં વન્દે મઙ્ગલમન્દિરમ્ ॥ ૨॥

રામચન્દ્રં ચિદાનન્દં રમ્યં રાજીવલોચનમ્ ।
સીતાપતિં ગતિં ગમ્યં વન્દે વિશ્વાત્મવિગ્રહમ્ ॥ ૩॥

રામબીજં જગદ્બીજં રામદેવં રમાદ્ભુતમ્ ।

રઘુનાથં મનોનાથં વન્દે રાકેશશીતલમ્ ॥ ૪॥

કોમલં કમલાકાન્તં કોશલેશં કૃપામયમ્ ।
કલ્યાણં કરુણાગારં વન્દે કૈવલ્યદાયકમ્ ॥ ૫॥

કાકુત્સ્થં કમલેશં ચ કૌશલ્યાનન્દનં હરિમ્ ।
કેશવં દેવદેવેશં વન્દે કન્દર્પસુન્દરમ્ ॥ ૬॥

જગદીશં જગન્નાથં જગન્નાટકનાયકમ્ ।
જગત્સમ્પુટરત્નં ચ વન્દે જ્યોતિર્મયં વિભુમ્ ॥ ૭॥

યોગદં જગદાધારં જાનકીશં જગત્પતિમ્ ।
જગદ્ગુરું જગદ્વન્દ્યં વન્દે યોગીન્દ્રજીવનમ્ ॥ ૮॥

લીલામનોહરં બાલં કૌશલ્યાનન્દવર્ધનમ્ ।
ચાપલ્યવૈભવં વન્દે ક્રીડાચાતુર્યસુન્દરમ્ ॥ ૯॥

લલિતં લક્ષ્મણાનન્દં શત્રુઘ્નભરતાગ્રજમ્ ।
કિશોરં ભક્તહૃચ્ચૌરં વન્દે લીલાવિલક્ષણમ્ ॥ ૧૦॥

ધનુર્ધરં હયારૂઢં વીરેન્દ્રં લક્ષ્યસુન્દરમ્ ।
વિદ્યુત્પુઞ્જપ્રભં પ્રાપ્યં વન્દે વીથીવિહારિણમ્ ॥ ૧૧॥

કીર્તિમન્તં કલારમ્યં માયેશં કૌતુકાલયમ્ ।
કેલિશીલમતૃપ્તં ચ વન્દેઽહં પિતૃલાલિતમ્ ॥ ૧૨॥

ચક્રવર્તિકુમારં ચ સર્વેશં છદ્મરૂપિણમ્ ।
વિશ્વાશ્રયં શ્રિયઃપ્રેષ્ઠં વન્દે દશરથાત્મજમ્ ॥ ૧૩॥

વિશ્વામિત્રં વિશાલાક્ષં વિશ્વામિત્રેણ યાચિતમ્ ।
વિદ્યાધરં મહાસૌમ્યં વન્દે મઞ્જુલભાષિણમ્ ॥ ૧૪॥

અચિન્ત્યં ચિત્રકારં ચ ચતુર્વ્યૂહં ચતુર્ભુજમ્ ।
ચારુવેષં ચિદાત્માનં વન્દે ચિન્તાવિમોચનમ્ ॥ ૧૫॥

તાટકાત્રાસનં ત્રાણં ત્રૈલોક્યેશં ત્રિવિક્રમમ્ ।
તત્ત્વાદ્ભુતં ચ તત્ત્વેશં વન્દે ત્રૈલોક્યતારકમ્ ॥ ૧૬॥

યજ્ઞરક્ષણદક્ષં ચ યજ્ઞભોક્તારમવ્યયમ્ ।
સુબાહુસૂદનં વન્દે મારીચમતિમન્થનમ્ ॥ ૧૭॥

તરુણં તારણે દક્ષં પૂજ્યં પતિતપાવનમ્ ।
અહલ્યોદ્ધારકં દેવં વન્દે દીનાર્ત્તિદારણમ્ ॥ ૧૮॥

જ્યોતિર્મૂર્તિં જગન્મૂર્તિં જાહ્નવીજન્મદાયકમ્ ।
અજેયં સર્વવિજ્ઞેયં વન્દે રાજેન્દ્રનન્દનમ્ ॥ ૧૯॥

સીતાસ્વયંવરે વન્દ્યં શ્રીમન્તં શ્રીસુધામ્બુધિમ્ ।
વિદેહસ્ય મનશ્ચૌરં વન્દે માધુર્યમન્દિરમ્ ॥ ૨૦॥

સીતાપુષ્પવને મુગ્ધં સીતાસૌન્દર્યમોહિતમ્ ।
સીતામુગ્ધિકરં દિવ્યં વન્દે સૌન્દર્યસાગરમ્ ॥ ૨૧॥

સીતાપ્રેમસુધાતૃપ્તં સીતાસીતાંશુશિલ્પનમ્ ।
દિવ્યાનન્દવનં વન્દે દિવ્યમાલ્યરલઙ્કૃતમ્ ॥ ૨૨
કાકપક્ષધરં ધીરં મિથિલાદર્શકં કલમ્ ।
શતાનન્દશતાનન્દં વન્દે દીપ્તાઙ્ગશાલિનમ્ ॥ ૨૩॥

મોદમૂલં મનોમૂલં મહામન્મથમન્મથમ્ ।
મનોજ્ઞં મનસાતીતં વન્દે સંસારરઞ્જનમ્ ॥ ૨૪॥

ભર્ત્તારં ભુવનાધારં ધનુર્યજ્ઞે ધનુર્ધરમ્ ।
પુરુષં પુણ્ડરીકાક્ષં વન્દે પુણ્યં પુરાતનમ્ ॥ ૨૫॥

બ્રહ્માણ્ડપાલકં શ્રીદં શ્રીશં વીર્યવતાં વરમ્ ।
બ્રહ્માણ્ડમણ્ડનં વન્દે ચણ્ડકોદણ્ડખણ્ડનમ્ ॥ ૨૬॥

કિશોરલલિતં નિત્યં નીલેન્દીવરસુન્દરમ્ ।
તેજોમયં તપઃપુઞ્જં વન્દે કૌશેયવાસસમ્ ॥ ૨૭॥

જાનકીહૃદયોલ્લાસં જાનકીપ્રાણવલ્લભમ્ ।
જગદ્વીરેન્દ્રવિખ્યાતં વન્દે વીરં જગજ્જયમ્ ॥ ૨૮॥

જાનકીહૃદયે હારં જયમાલાવિભૂષિતમ્ ।
સીતાપ્રેમસુધામગ્નં વન્દે સીતામનોહરમ્ ॥ ૨૯॥

નવદૂર્વાદલશ્યામં કામં નીલમણિપ્રભમ્ ।
પીતામ્બરધરં વન્દે વનમાલાવિભૂષિતમ્ ॥ ૩૦॥

બિમ્બાધરં સુધાસિક્તં નાસામુક્તામનોહરમ્ ।
દિવ્યાકૃતિરસં વન્દે દિવ્યાલઙ્કારભૂષિતમ્ ॥ ૩૧॥

પુષ્પહાસં સરોજાક્ષં કૈશોરામૃતવર્ષિણમ્ ।
કૈશોરાદ્ભુતમાધુર્યં વન્દે લાવણ્યનિર્ઝરમ્ ॥ ૩૨॥

બિભ્રન્નૂપુરપાદાબ્જં મઞ્જયં ભૂષણસુન્દરમ્ ।
રૂપામૃતઘનં ભૂપં વન્દે ચન્દનચર્ચિતમ્ ॥ ૩૩॥

ભૂષણાદ્ભુતશ‍ૃઙ્ગારં રત્નરાગૈશ્ચ રઞ્જિતમ્ ।
કિરીટિનં સુધાકણ્ઠં વન્દે કૌસ્તુભધારિણમ્ ॥ ૩૪॥

વિદેહહૃદયાનન્દં વિદેહમહિષીપ્રિયમ્ ।
રૂપરત્નં રસાક્રાન્તં વન્દે જ્ઞાનતરોઃ ફલમ્ ॥ ૩૫॥

સુબોધં ક્રોધહન્તારં જિતક્રોધં બૃહદ્બલમ્ ।
જામદગ્ન્યજિતં વન્દે વિષ્ણું પૂર્ણાવતારિણમ્ ॥ ૩૬॥

જામાતરં વિદેહસ્ય વિવાહે મણ્ડપસ્થિતમ્ ।
સીતયા શોભિતં વન્દે મધુરં જાનકીવરમ્ ॥ ૩૭॥

કામેશં કમનીયં ચ કૌસલ્યાપ્રેમલાલિતમ્ ।
અયોધ્યાપ્રકૃતિપ્રાણં વન્દે ભદ્ર ભવાર્દનમ્ ॥ ૩૮॥

સીતાસુધાનિધિં સ્નિગ્ધં શીતાંશુસદૃશાનનમ્ ।
સીતાવિહારિણં વિજ્ઞં વન્દે સીતાસુકોમલમ્ ॥ ૩૯॥

છવિમૂલં ક્ષમામૂલં ક્ષીરનીરેશવાસિનમ્ ।
સૂક્ષ્મં વેદમયં વન્દે નિર્માનં સર્વનિસ્પૃહમ્ ॥ ૪૦॥

સર્વસદ્ગુણસમ્પન્નં ચક્રવર્તિમનોહરમ્ ।
માયાપતિં ત્રપાશીલં વન્દે દેવર્ષિવન્દિતમ્ ॥ ૪૧॥

ભૂમાનં ભવભૂમાનં દેવાધારં દયાનિધિમ્ ।
સર્વૈકરસં વન્દે કાનને ગમનોત્સુકમ્ ॥ ૪૨॥

વિજનં વિજિતાત્માનં સત્યાનન્દં સદાત્મકમ્ ।
જાનકીરત્નવારીશં વન્દે સર્વજગત્પ્રિયમ્ ॥ ૪૩॥

સત્યાશ્રયં ચ સત્યાપ્તં સુયાનં વંશભૂષણમ્ ।
સત્યેશં સરલં વન્દે ધર્મોદ્ધારાર્થતત્પરમ્ ॥ ૪૪॥

ધર્મપ્રાણં ધરાધારં ધર્માઙ્ગં ધર્મવત્સલમ્ ।
ધર્માલયં ધર્મરૂપં વન્દે ધર્મધુરન્ધરમ્ ॥ ૪૫॥

પ્રજાનાથં મહાનાથં નિશ્ચલં પિતૃવત્સલમ્ ।
નિષાદસુહૃદં વન્દે સુમન્તસુમતિપ્રદમ્ ॥ ૪૬॥

પરેશં પરમોદારં ચરણોદકદાયકમ્ ।
નિષાદનિબિડાનન્દં વન્દે ભક્તપરાજિતમ્ ॥ ૪૭॥

ગતદ્વન્દ્વં મુકુન્દં ચ પ્રતિજ્ઞાપરિપાલકમ્ ।
ભારદ્વાજપ્રિયં વન્દે વાગ્મિવાલ્મીકિવન્દિતમ્ ॥ ૪૮॥

કમલાકોમલાઙ્ગં ચ વલ્કલામ્બરધારિણમ્ ।
જટાજૂટધરં વન્દે ચિત્રકૂટાદ્રિચારિણમ્ ॥ ૪૯॥

કન્દમૂલાશિનં કેશં વનેશં વનવાસિનમ્ ।
દિવ્યકેલિનિધિં વન્દે જ્યોતિષ્પારં પરાત્પરમ્ ॥ ૫૦॥

બન્ધુપ્રેમાણવે મગ્નં ભાવેશં ભરતાશ્રયમ્ ।
પ્રેમાકુલં ધ્રુવં વન્દે પ્રજેશં પાદુકાપ્રદમ્ ॥ ૫૧॥

સત્યાત્મકં સમં સર્વં સમાધારં સમાવૃતમ્ ।
વૈરાગ્યવિગ્રહં વન્દે તાપઘ્નં ચ તપોનિધિમ્ ॥ ૫૨॥

સ્રગ્વિણં  છવિપર્જન્યં કિરાતાનાં સુખપ્રદમ્ ।
પ્રેમાવતારિણં વન્દે સાનુક્રોશાસ્મિતેક્ષણમ્ ॥ ૫૩॥

કાનને રમમાણં ચ મન્દાકિન્યાં વિહારિણમ્ ।
નિત્યોત્સવં નવં વન્દે વૈદેહીરાગરઞ્જિતમ્ ॥ ૫૪॥

પુષ્પવત્સુકુમારં ચ પુષ્પશૃઙ્ગારકારિણમ્ ।
શ્રમિતં પુષ્પભારેણ વન્દે સીતાવિમોહનમ્ ॥ ૫૫॥

જયન્તસ્ય જયન્તં ચ જાનકીપ્રેમજીવનમ્ ।
વીરરૂપં જગદ્ભૂપં વન્દે દુષ્ટવિમર્દનમ્ ॥ ૫૬॥

અત્રિવન્દ્યં બૃહદ્ગર્ભં બ્રહ્મગર્ભં પ્રવર્તકમ્ ।
અનુસૂયાપ્રિયં વન્દે દત્તાત્રેયં સુરાર્ચિતમ્ ॥ ૫૭॥

ચિદ્-ઘનં ચિન્તનીયં ચ ચન્દ્રકોટિનિભાનનમ્ ।
ચિત્રકૂટપતિં વન્દે ચૈતન્યં ચિત્તકર્ષણમ્ ॥ ૫૮॥

વિરાધવધકર્તારં શરભઙ્ગ ગતિપ્રદમ્ ।

વિશ્વેશનાયકં વન્દે વિશ્વનાટકવૈભવમ્ ॥ ૫૯॥

સુતીક્ષ્ણહૃદયેશં ચ પ્રેમાકાશવિભાકરમ્ ।
પ્રેમમૂર્તિં પરં દિવ્યં વન્દે પ્રેમલતાફલમ્ ॥ ૬૦॥

પ્રેમાર્ણવં પરાત્માનં પ્રેમરત્નપરીક્ષકમ્ ।
પ્રીતિકાન્તં પરં કાન્તં વન્દે પુષ્કરલોચનમ્ ॥ ૬૧॥

અગસ્ત્યાનન્દદાતારં દિવ્યાઙ્ગં દેવસુન્દરમ્ ।
કોદણ્ડમણ્ડિતં વન્દે ભક્તાનામાર્તિભઞ્જનમ્ ॥ ૬૨॥

યોગીન્દ્રજ્ઞાનદીપં ચ સાકારં નિર્ગુણાશ્રયમ્ ।
મુરારિં મોક્ષદં વન્દે નિર્લિપ્તં દીપ્તતેજસમ્ ॥ ૬૩॥

તત્ત્વાત્પરં પરં તત્ત્વં દણ્ડકારણ્યપાવનમ્ ।
ગૃધ્રરાજપ્રિયં વન્દે દીનેશં દીનવત્સલમ્ ॥ ૬૪॥

સીતાસુખં સુખાસીનં સુમિત્રાનન્દનાગ્રજમ્ ।
પ્રમોદદં પ્રમાપુઞ્જં વન્દે પઞ્ચવટીસ્થિતમ્ ॥ ૬૫॥

રૂપયૌવનસમ્પન્નં રાક્ષસીચિત્તમોહનમ્ ।
શુદ્ધં સત્ત્વનિધિં વન્દે નીતિશાસ્ત્રવિશારદમ્ ॥ ૬૬॥

વિદુષં વેદનિષ્ણાતં પૂર્વં કારણકારણમ્ ।
નિષ્કલઙ્કં કૃપાલીનં વન્દે યુક્તફલપ્રદમ્ ॥ ૬૭॥

અનૂપં શ્રીવરં શૂરં દુર્ગમં દીપ્તલોચનમ્ ।
ત્રિશિરઃત્રાસનં  વન્દે ખરારિં દૂષણારિકમ્ ॥ ૬૮॥

મહાધીરં મહાવીરં પ્રિયાપ્રેમાનુરઞ્જિતમ્ ।
જાનકીં હૃદિ ધર્તારં વન્દે માયામહાર્ણવમ્ ॥ ૬૯॥

અનર્થનાશનં સાર્થં સમર્થં રાક્ષસાન્તકમ્ ।
પ્રેરકં પરમાચિન્ત્યં વન્દે પાખણ્ડખણ્ડનમ્ ॥ ૭૦॥

અધોક્ષજં ધરાધીશં લોકલીલાવિચક્ષણમ્ ।
મૃગયાકુશલં વન્દે માયામારીચમર્દનમ્ ॥ ૭૧॥

નાટ્યશીલં ક્રિયાશીલં સુશીલં લોકલોચનમ્ ।
કારુણ્યકોમલં વન્દે વૈદેહીવિરહાકુલમ્ ॥ ૭૨॥

નિર્વિકારં નરાકારં નિરાકારં નિરામયમ્ ।
નિર્ભયં નિર્ભરાનન્દં વન્દે નિસ્સીમવૈભવમ્ ॥ ૭૩॥

નિષ્ક્રિયં નિલયં નેયં ગૂઢં ગૌરીશવન્દિતમ્ ।
અનુત્તમં મહામાર્ગં વન્દે સર્વવિમોહનમ્ ॥ ૭૪॥

રસવન્તં રસાનન્તં વૈદેહીગુણગાયકમ્ ।
ધ્યાનમુગ્ધં પ્રિયાધીનં વન્દે માયામનોહરમ્ ॥ ૭૫॥

સત્યસન્ધં સ્મરાતીતં સીતાન્વેષણતત્પરમ્ ।
મહેષ્વાસં મહાગોપ્યં વન્દે પ્રેમપ્રપૂરિતમ્ ॥ ૭૬॥

દયાલું ચ દયામૂલં ભક્તાઙ્કં કરુણાર્ણવમ્ ।
મઞ્જુમુક્તિપ્રદં વન્દે જટાયોર્ધામદાયકમ્ ॥ ૭૭॥

બૃહન્નિયમં બ્રહ્મણ્યં કબન્ધવધપણ્ડિતમ્ ।
વન્દે વિક્રમશાલીનં ક્રીડાગારં કૃતાગમમ્ ॥ ૭૮॥

શબરીશર્વરીનાથં શબરીસ્નેહસિઞ્ચિતમ્ ।
પ્રેમપુષ્પમિલિન્દં ચ વન્દે પ્રેમફલાશિનમ્ ॥ ૭૯॥

ભક્તાવાસમનાવાસં ભાવં ભક્તૈકસઙ્ગિનમ્ ।
દાસદર્શનદાતારં વન્દે બ્રહ્મર્ષિદુર્લભમ્ ॥ ૮૦॥

દિનેશં દીનબન્ધું ચ દીનનાથં દયામયમ્ ।
દેવર્ષિબોધદાતારં વન્દે દાસાનુરક્ષકમ્ ॥ ૮૧॥

પ્રકાશં પરમાકાશં પમ્પાસૌન્દર્યદર્શકમ્ ।
સુગ્રીવસુખદાતારં વન્દે ગમ્ભીરદર્શનમ્ ॥ ૮૨॥

શાશ્વતં શાન્તિભોક્તારં હૃષીકેશં હૃદિસ્થિતમ્ ।
વિજ્ઞાનવિગ્રહં વન્દે વિશ્વકઞ્જવિકાશકમ્ ॥ ૮૩॥

અઞ્જનીનન્દનાનન્દં નિર્વિકલ્પં કલાભૃતમ્ ।
નારાયણં નરં વન્દે નિધાનં મુનિરૂપિણમ્ ॥ ૮૪॥

સુગ્રીવસુહૃદં સુન્દં સુરાધીશં શિશિપ્રભમ્ ।
સ્વાલોકમવ્યયાલોકં વન્દે સર્વાશયે સ્થિતમ્ ॥ ૮૫॥

નિર્વ્યલીકં પ્રતીકં ચ સપ્તતાલવિભેદકમ્ ।
ક્ષેપ્તારં દુન્દુભેરસ્થીનં વન્દે સત્યપરાક્રમમ્ ॥ ૮૬॥

અગાધં પરમારાધ્યં બાલિવારણદારણમ્ ।
ભક્તપાલં જગત્પાલં વન્દે દર્પવિમર્દનમ્ ॥ ૮૭॥

ગર્વઘ્નં ગરિમાગારં ગોતીતં જ્ઞાનદાયકમ્ ।
ગોપતિં ગોગતિં વન્દે ગોવિન્દં ગતિસત્તમમ્ ॥ ૮૮॥

તારપ્રબોધકર્તારં તારાધિપનિભાનનમ્ ।
સુગ્રીવરાજ્યદાતારં વન્દે સત્યભૃતાં વરમ્ ॥ ૮૯॥

પ્રવર્ષણે વસન્તં ચ લક્ષ્મણે તત્ત્વભાષિણમ્ ।
ભક્તાન્ભજન્તમભ્રાન્તં વન્દે શ્રીસ્મરણાકુલમ્ ॥ ૯૦॥

મૂર્તિમન્તાનુરાગં ચ પરોક્ષે પ્રીતિપાલકમ્ ।
એકાન્તપ્રેમિણં વન્દે ભક્તરક્ષાર્થચિન્તિતમ્ ॥ ૯૧॥

સીતાન્વેષણવ્યગ્રં ચ પ્લવગાધિપશિક્ષકમ્ ।
તેજસ્સમન્વિતં વન્દે સર્વજ્ઞં સર્વબોધદમ્ ॥ ૯૨॥

અશોકં શોકનિર્વાણં વાનરાનીકદર્શકમ્ ।
મુદ્રિકાદાયિનં વન્દે વાયુપુત્રબલપ્રદમ્ ॥ ૯૩॥

કામદં કલ્પનાતીતં મહાકલ્પં કલાધરમ્ ।
સમ્પાતિપક્ષદાતારં વન્દે સાગરતારણમ્ ॥ ૯૪॥

અશોકવનિકામધ્યે સીતાધ્યાને વિરાજિતમ્ ।
અચિન્ત્યં ચિન્ત્યસૌન્દર્યં વન્દે શક્તીશ્વરીપ્રિયમ્ ॥ ૯૫॥

વિક્રમં ચાઞ્જનેયસ્ય સમ્ભવં સ્વપ્નદર્શનમ્ ।
લઙ્કેશક્લેશદાતારં વન્દે લઙ્કાવિનાશનમ્ ॥ ૯૬॥

કૃતજ્ઞં હનુમત્પ્રેષ્ઠં દાન્તં શાન્તવિલોચનમ્ ।
જગત્પ્રાણં જનાનન્દં વન્દે યોગીન્દ્રપાવનમ્ ॥ ૯૭॥

મહારથિં મહાબાહું દુર્દર્શં દૈત્યમર્દનમ્ ।
કોદણ્ડસ્ફાલયન્તં ચ વન્દે લઙ્કાભયઙ્કરમ્ ॥ ૯૮॥

કેશવન્દિતપાદાબ્જં કપીનાં નૃત્યદર્શકમ્ ।
કપીનાં નયનાનન્દં વન્દે સૌલભ્યસુન્દરમ્ ॥ ૯૯॥

સર્વસૃષ્ટિસૃજન્તં ચ સૃષ્ટિકાનનમાલિનમ્ ।

કૌશલેશકુમારં ચ વન્દે દીપ્તકલેવરમ્ ॥ ૧૦૦॥

અકારણકૃપાગારં શરણ્યં પ્રણપાલકમ્ ।
વિભીષણસ્ય વિશ્રામં વન્દે લઙ્કાપ્રદાયકમ્ ॥ ૧૦૧॥

સિન્ધુશોષણશીલં ચ સિન્ધુદર્પવિમર્દનમ્ ।
નિર્મલં નિર્મમં વન્દે સાગરેણાભિવન્દિતમ્ ॥ ૧૦૨॥

સાગરે સેતુકર્તારં સર્વયુદ્ધવિશારદમ્ ।
સર્વદેવાધિદેવં ચ વન્દે શઙ્કરસંસ્તુતમ્ ॥ ૧૦૩॥

સુવેલશિખરારૂઢં સુગ્રીવેણ સુશોભિતમ્ ।
સૌમિત્રિસેવિતં વન્દે વાયુપુત્રેણ સત્કૃતમ્ ॥ ૧૦૪॥

ધન્વિનં લોકજેતારં સીતાદર્શનકાઙ્ક્ષિણમ્ ।
ભયાય ભયદં વન્દે ભક્તમોહાન્ધભઞ્જનમ્ ॥ ૧૦૫॥

અમોઘાસ્ત્રં ભવાવાસં ભક્તવાક્પરિપાલકમ્ ।
ઇક્ષ્વાકુનન્દનં વન્દે રાક્ષસાનીકનાશનમ્ ॥ ૧૦૬॥

દુર્જયં દુષ્ક્રમં દુર્ગં દુર્ધર્ષં સુદુરાસદમ્ ।
મહાદિવ્યં મહાદિત્યં વન્દે યુદ્ધભયઙ્કરમ્ ॥ ૧૦૭॥

કુમ્ભકર્ણનિહન્તારં જટામુકુટમણ્ડિતમ્ ।
દુર્ધરં દૈત્યકાલં ચ વન્દે દૈત્યનિકન્દનમ્ ॥ ૧૦૮॥

લઙ્કેશસ્ય કૃતાન્તં ચ લઙ્કેશશિરકૃન્તનમ્ ।
લઙ્કાધ્વંસકરં વન્દે ભીમં શસ્ત્રભૃતાં વરમ્ ॥ ૧૦૯॥

રાઘવેશં રથાસીનં રાક્ષસાઘૌઘનાશનમ્ ।
દિવ્યાયુધધરં વન્દે નિર્દ્વન્દ્વં ખલખણ્ડનમ્ ॥ ૧૧૦॥

ઘનરૂપં ઘનાનન્દં ઘનશ્યામં ઘનદ્યુતિમ્ ।
ઘનાલોકં ઘનચ્છન્દં વન્દે ઘોરાર્તિનાશનમ્ ॥ ૧૧૧॥

દશગ્રીવનિહન્તારં માયાઢ્યં માયયાદ્ભુતમ્ ।
અનાદિનિધનં ધન્યં વન્દે રાવણદારણમ્ ॥ ૧૧૨॥

કાલકાલં મહાકાલં કાલાતીતં કલાનિધિમ્ ।
કૈવલ્યનિલયં વન્દે શ્રીકાન્તં શાર્ઙ્ગધારિણમ્ ॥ ૧૧૩॥

અનન્તં ગુણગમ્ભીરં સ્વચ્છન્દં ગર્વસૂદનમ્ ।
સહાસવદનં દૈવં વન્દે દેવનમસ્કૃતમ્ ॥ ૧૧૪॥

જ્ઞાનાનન્દં ચિરાનન્દં પૂર્ણાનન્દં મહાપ્લવમ્ ।
મોક્ષતીર્થં મહાતીર્થં વન્દે રાવણતારણમ્ ॥ ૧૧૫॥

દૈત્યાનામન્તકં વન્દે દૈત્યાન્તઃકરણપ્રિયમ્ ।
સુદર્શનં સુધાહાસં દેવેશં નિત્યસુન્દરમ્ ॥ ૧૧૬॥

સ્ર્વતન્ત્રં સ્વતન્ત્રં ચ સીતાપ્રીતિપરીક્ષકમ્ ।
સીતાવ્રતં સદાધીનં વન્દે સીતાસુશોભિતમ્ ॥ ૧૧૭॥

કલ્પવૃક્ષં કલામૂલં સર્વલોકમનોહરમ્ ।
હનુમદ્ધૃદયાહ્લાદં વન્દે ગન્ધર્વવન્દિતમ્ ॥ ૧૧૮॥

વિભીષણાભિષેક્તારં કપિકૌતુકદર્શકમ્ ।
ભક્ત્યા ગ્રાહ્યં સદાનન્ચં વન્દે લીલાવિનોદિનમ્ ॥ ૧૧૯॥

વ્રતિનો ભરતભ્રાતુર્દર્શનોત્સુકમાનસમ્ ।
પુષ્પકે ભ્રાજમાનં ચ વન્દે દુર્લભદર્શનમ્ ॥ ૧૨૦॥

પદ્મનામં સુમેધામં નીરજાભં નિરઙ્કુશમ્ ।
હનુમત્પ્રેષકં વન્દે મુનીન્દ્રાનન્દસાગરમ્ ॥ ૧૨૧॥

અપ્રમેયં મુનિધ્યેયં સત્ત્વસ્થં સિંહગામિનમ્ ।
તુમલં સઙ્કુલં વન્દે વિસ્મયોત્ફુલ્લલોચનમ્ ॥ ૧૨૨॥

વિમોદં વિમદં વેદં કન્દં ચન્દ્રમિવોદિતમ્ ।
વશિષ્ઠાયનમન્તં ચ વન્દે ધર્મશિખામણિમ્ ॥ ૧૨૩॥

તપોમયં તપોમૂર્તિં તપસ્વિભ્રાતૃદર્શકમ્ ।
તમોહરં ત્રિકાવાસં વન્દે પ્રેમાશ્રુલોચનમ્ ॥ ૧૨૪॥

સરોજસકુમારં ચ સર્વમાત્રભિલાલિતમ્ ।
પ્રીણયન્તં સખીન્વન્દે સર્વામાત્યપ્રજાપ્રિયમ્ ॥ ૧૨૫॥

ચક્રવર્તિસુધાકીર્તિં ચક્રવર્તિનૃપેશ્વરમ્ ।
અયોધ્યાધિપતિં વન્દે રાજ્યસિંહાસને સ્થિતમ્ ॥ ૧૨૬॥

રમણીયં રસાસક્તં કિશોરીકાન્તિરઞ્જિતમ્ ।
શૃઙ્ગારસાગરં વન્દે રત્નચ્છત્રસુશોભિતમ્ ॥ ૧૨૭॥

સિંહાસને સમાસીનં કોટિસૂર્યસમપ્રભમ્ ।
રામામનોહરં હૃષ્ટં વન્દે રાઘવનન્દનમ્ ॥ ૧૨૮॥

રાજ્યપાલનદક્ષં ચ બ્રહ્મકોટિપ્રજાપતિમ્ ।
પ્રેમયજ્ઞફલં વન્દે રાજેન્દ્રં રાષ્ટ્રરઞ્જનમ્ ॥ ૧૨૯॥

નિત્યનાથં નિલિમ્પેશં નીતં નિત્યવિહારિણમ્ ।
નિપુણં રત્નમભ્રાઙ્ગં વન્દે કુઞ્ચિતકુન્તલમ્ ॥ ૧૩૦॥

સરયૂવિહરન્તં ચ કૃપાલું કુઙ્કુમાઙ્કિતમ્ ।
સીતારૂપવને ભૃઙ્ગં વન્દે પ્રેમપ્રફુલ્લિતમ્ ॥ ૧૩૧॥

પુષ્પકન્દુકક્રીડન્તં પુષ્પગુચ્છવિભૂષિતમ્ ।
પ્રાણાધારમણું પ્રેષ્ઠં વન્દે પ્રેમપ્રદીપકમ્ ॥ ૧૩૨॥

નિકુઞ્જલલિતં સઙ્ગં વસન્તં રાગરઞ્જિતમ્ ।
મલીનહૃદયાદ્દૂરં વન્દે માયાસુધાનિધિમ્ ॥ ૧૩૩॥

ભક્તાક્ષિનલિનાલિન્દં ભક્તાહ્લાદં રસાત્મકમ્ ।
ભૃદેવં ભુવનાનન્દં વન્દે ભૂતિવિભૂષણમ્ ॥ ૧૩૪॥

જ્ઞાનં સ્વચ્છમભિવ્યક્તં ગીતાતત્ત્વોપદેશકમ્ ।
તારકં વારકં વન્દે શ્રીસેવ્યં સુકૃતેઃ પરમ્ ॥ ૧૩૫॥

સૌગન્ધ્યદં સમાવિષ્ટં સંસ્તુતં સનકાદિભિઃ ।
રસાલં લલનં વન્દે વિનીતં પ્રકૃતેઃ પરમ્ ॥ ૧૩૬॥

યજ્ઞેશં યજ્ઞકર્તારં યજ્ઞનારાયણં યુતમ્ ।
યશસ્વિનં યથાપૂર્વં વન્દે બ્રહ્માણ્ડવિગ્રહમ્ ॥ ૧૩૭॥

ભુશુણ્ડિમોહનં ગણ્યં ગૂઢાર્થં ગરુડધ્વજમ્ ।
મન્ત્રકારં મહામન્ત્રં વન્દે મોહનિકૃન્તનમ્ ॥ ૧૩૮॥

ઉગ્રં સમગ્રમાત્મજ્ઞં સઙ્ગ્રાહ્યં શક્તમગ્રિમમ્ ।
અતન્દ્રિકમતિક્રાન્તં વન્દે વશ્યં વિકર્ષણમ્ ॥ ૧૩૯॥

લક્ષ્મીશં લલનાલક્ષ્યં લક્ષ્મીલક્ષ્મિવિવર્ધનમ્ ।
લક્ષ્મીલક્ષિતમાત્મીયં વન્દે લીલામહોદધિમ્ ॥ ૧૪૦॥

નાનાવતારધર્ત્તારં નાનાસૃષ્ટિપ્રવર્તકમ્ ।

નટનારાયણં વન્દે નિરીહં નાટ્યકારકમ્ ॥ ૧૪૧॥

મત્સ્યં કૂર્મં વરાહં ચ નૃસિંહં બટુવામનમ્ ।
ભાર્ગવં રાઘવં કૃષ્ણં વન્દે બુદ્ધં ચ કલ્કિનમ્ ॥ ૧૪૨॥

મહાવિષ્ણું મહાજિષ્ણું સહિષ્ણું સર્વતોમુખમ્ ।
મહાર્ઘં માર્મિકં વન્દે મહારમ્ભં મહાભવમ્ ॥ ૧૪૩॥

સખાયં ગોપબાલાનાં ગોપીશં રાધિકાધનમ્ ।
રાસેશં લલિતાકાન્તં વન્દે વંશીમનોહરમ્ ॥ ૧૪૪॥

શ્રીમાલં તુલસીમાલં માનં શ્રીહૃદયાલયમ્ ।
અવધેશં મહાશેષં વન્દે શૂન્યં સમાપકમ્ ॥ ૧૪૫॥

અશેષં હૃદયેશં ચ શક્રેશં શઙ્કરેશ્વરમ્ ।
સર્વેશ્વરં ધરં વન્દે મહામાયેશ્વરં વરમ્ ॥ ૧૪૬॥

અચ્યુતં ભૂમિકાન્તં ચ ભૂરિનાથં વિભાજકમ્ ।
વાસુદેવં પ્રલમ્બારિં વન્દે હંસં હયેશ્વરમ્ ॥ ૧૪૭॥

વિરાડ્-રૂપં વિમુક્તાઙ્ગં  બિશ્રબ્ધં વાસવાનુજમ્ ।
સંવેદ્યં સક્ષમં વન્દે સમષ્ટિં સૃષ્ટિસ્રગ્ધરમ્ ॥ ૧૪૮॥

ભક્તાનાં ભક્તિમન્તં ચ ભક્તાનાં નયનોત્સવમ્ ।
ભક્તાનુરક્તમવ્યક્તં વન્દે ભીષ્મં મયાપહમ્ ॥ ૧૪૯॥

પ્રધાનં પઞ્ચકં પથ્યં પ્રશ્રયં પ્રેમપ્રસ્થિતમ્ ।
પ્રત્યયં પ્રેમપ્રચ્છન્નં વન્દે પ્રાંશું પ્રલમ્બનમ્ ॥ ૧૫૦॥

રસેશં રસિકાચાર્યં રામાનન્દં રમાકરમ્ ।
રઞ્ચકં રુચિરં વન્દે રૂપકં રસિતં રતમ્ ॥ ૧૫૧॥

પરેશં પરમાયેશં પુરાણં પુરુષોત્તમમ્ ।
પાટવં પ્રણવં વન્દે પુણ્યશ્લોકં પ્રતર્દનમ્ ॥ ૧૫૨॥

મહત્તરં મહત્તત્ત્વં જ્વલન્તં જલશાયિનમ્ ।
અખણ્ડં મણ્ડલં વન્દે પ્રચણ્ડં ચણ્ડવિક્રમમ્ ॥ ૧૫૩॥

વિશાલં વિશદં વિશ્વં વિચિત્રં વિશ્વવાઞ્છિતમ્ ।
વિરક્તં વિશ્રુતં વૃન્દં વન્દે વ્યૂહં વશીકરમ્ ॥ ૧૫૪॥

વૈકુણ્ઠં વિનયાનન્દં માધવં માધવીશ્વરમ્ ।
ઉમાધવેશ્વરં વન્દે મહાપારં પરીક્ષિતમ્ ॥ ૧૫૫॥

ધાતારં સુષમાસારં સારઙ્ગં સાત્વતાં પતિમ્ ।
વરેણ્યં વત્સલં વન્દે જગન્મૂલં જનાર્દનમ્ ॥ ૧૫૬॥

અનામયં સમાકીર્ણં સ્વાનન્દં સ્વરસાશ્રયમ્ ।
શ્રીકરં શ્રીધરં વન્દે શ્રીવાસં શ્રીકરગ્રહમ્ ॥ ૧૫૭॥

અમેયમમૃતત્વેશં વિપાકં પરમાક્ષરમ્ ।
એકાન્તવલ્લભં વન્દે જ્યોતીરૂપમનુગ્રહમ્ ॥ ૧૫૮॥

અનલ્પં સત્યસઙ્કલ્પં નિષ્પ્રપઞ્ચં ચરાચરમ્ ।
ઉપાધિરહિતં વન્દે નિગ્રહં નિખિલાત્મકમ્ ॥ ૧૫૯॥

અદ્ભુતાલયમાદેયં સર્વાતિગમતીન્દ્રિયમ્ ।
ઇન્દિરામન્દિરં વન્દે બ્રહ્મજ્યોતિઃ સનાતનમ્ ॥ ૧૬૦॥

લીલાતનું લતાશ્લિષ્ટં સુકુમારં કલસ્વનમ્ ।
પ્રીતિબદ્ધં વિદગ્ધં ચ વન્દે દર્શનદાયકમ્ ॥ ૧૬૧॥

અદ્ભુતં કર્મકર્તારં સર્વસામર્થ્યશાલિનમ્ ।
વ્યાસાદિવન્દિતં વન્દે ક્લેશસંસ્કારનાશનમ્ ॥ ૧૬૨॥

શ્રીનાથં સુરતેશં ચ સુવેશં વનમાલિનમ્ ।
પ્રણયેશં પણં વન્દે પ્રવીણં વીક્ષણાયુધમ્ ॥ ૧૬૩॥

ભવન્તં ભાવયન્તં ચ ભ્રામયન્તં ભ્રમાત્પરમ્ ।
ઉદ્ભવં પ્રલયં વન્દે મુક્તમોક્ષમનોરમમ્ ॥ ૧૬૪॥

॥ શ્રીમુક્તમોક્ષમનોરમાય નમઃ ॥

શ્રીરામનામસાહસ્રં દિવ્યં લીલાસમન્વિતમ્ ।
યઃ પઠેન્મધુરાલાપૈઃ પ્રાપ્નુયાત્સર્વવાઞ્છિતમ્ ॥

શ્રીજયરામદેવેન નિર્મિતં સુન્દરં સ્તવમ્ ।
યઃ પઠેત્કામનાં ત્યક્ત્વા પ્રાપ્નુયાદ્રામદર્શનમ્ ॥

ઇતિ સ્વામી શ્રીજયરામદેવજી મહારાજવિરચિતં શ્રીરામસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Aman Raja Sood

*Shrirama Sahasranamastotram 6*

pdf was typeset on May 21, 2026

Please send corrections to *sanskrit@cheerful.com*